# Shri MahakAla Shanimrityunjaya Stotram

# શ્રીમહાકાલશનિમૃત્યુઞ્જયસ્તોત્રમ્

## Document Information

Text title : mahAkAlashanimRityunjayastotram

File name : mahAkAlashanimRityunjayastotra.itx

Category : navagraha, shataka

Location : doc_z_misc_navagraha

Source : Martandabhairavatantra

Latest update : July 20, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 21, 2022

*sanskritdocuments.org*

# શ્રીમહાકાલશનિમૃત્યુઞ્જયસ્તોત્રમ્

અથઃ ધ્યાનમ્ ।

નીલાદ્રિશોભાઞ્ચિતદિવ્યમૂર્તિઃ ખડ્ગી ત્રિદણ્ડી શરચાપહસ્તઃ ।

શમ્ભુર્મહાકાલશનિઃ પુરારિર્જયત્યશેષાસુર નાશકારી ॥

અથઃ વિનિયોગઃ ।

ૐ અસ્ય શ્રીમહાકાલશનિમૃત્યુઞ્જય સ્તોત્રમન્ત્રસ્ય

પિપ્પલાદિઋષિરનુષ્ટુપ્છન્દો મહાકાલશનિર્દેવતા શં બીજમાયસો શક્તિઃ

કાલપુરુષાયેતિ કીલકં મમાકાલાપમૃત્યુનિવારણાર્થે પાઠે વિનિયોગઃ ॥

અથ ઋષ્યાદિન્યાસઃ -

ૐ પિપ્પલાદઋષયે નમઃ શિરસિ ।

ૐ અનુષ્ટુપછન્દસે નમઃ મુખે ।

ૐ મહાકાલશનિ દેવતાયૈ નમઃ હૃદે ।

ૐ શં બીજાય નમઃ ગુહ્યે ।

ૐ આયસી શક્તયે નમઃ પાદયોઃ ।

ૐ કાલપુરુષં કીલકાય નમઃ નાભૌ ।

ૐ વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

અથ કરન્યાસઃ -

ૐ પિપ્પલાદઋષયે નમઃ અઙ્ગુષ્ઠાભ્યાં નમઃ ।

ૐ અનુષ્ટુપછન્દસે નમઃ તર્જનીભ્યાં નમઃ ।

ૐ મહાકાલશનિદેવતાયૈ નમઃ મધ્યમાભ્યાં નમઃ ।

ૐ શં બીજાય નમઃ અનામિકાભ્યાં નમઃ ।

ૐ આયસી શક્તયે નમઃ કનિષ્ઠિકાભ્યાં નમઃ ।

ૐ કાલપુરુષં કીલકાય નમઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અથ હૃદયન્યાસઃ -

ૐ પિપ્પલાદઋષયે હૃદયાય નમઃ ।

ૐ અનુષ્ટુપછન્દસે શિરસે સ્વાહા ।
ૐ મહાકાલશનિદેવતાયૈ શિખાયૈ વષટ્ ।
ૐ શં બીજે કવચાય હુમ્ ।
ૐ આયસી શક્તયે નેત્રત્રયાય વૌષટ્ ।
ૐ કાલપુરુષાય અસ્ત્રાય ફટ્ ॥

અથ દેહન્યાસઃ -
ૐ મહોગ્રં મૂર્ધ્નિ । ૐ વૈવસ્વતં મુખે । ૐ મન્દં ગલે ।
ૐ મહાગ્રહં બાહવોઃ । ૐ મહાકાલં હૃદયે । ૐ કૃશતનું ગુહ્યે ।
ૐ તુડુચરં જાન્વો । ૐ શનૈશ્ચરં પાદયોઃ ॥

ૐ શ્રી ગણેશાય નમઃ । ૐ શ્રી શનૈશ્ચરાય નમઃ ॥

અથ શનૈશ્ચરમૃત્યુઞ્જયસ્તોત્રમ્ ।
ૐ મહાકાલશનિમૃત્યુઞ્જાયાય નમઃ ।
નીલાદ્રીશોભાઞ્ચિતદિવ્યમૂર્તિઃ ખડ્ગો ત્રિદણ્ડી શરચાપહસ્તઃ ।
શમ્ભુર્મહાકાલશનિઃ પુરારિર્જયત્યશેષાસુરનાશકારી ॥ ૧॥

મેરુપૃષ્ઠે સમાસીનં સામરસ્યે સ્થિતં શિવમ્ ।
પ્રણમ્ય શિરસા ગૌરી પૃચ્છતિસ્મ જગદ્ધિતમ્ ॥ ૨॥

પાર્વત્યુવાચ -
ભગવન્ ! દેવદેવેશ ! ભક્તાનુગ્રહકારક ! ।
અલ્પમૃત્યુવિનાશાય યત્ત્વયા પૂર્વ સૂચિતમ્ ॥ ૩॥

તદેવત્વં મહાબાહો ! લોકાનાં હિતકારકમ્ ।
તવ મૂર્તિ પ્રભેદસ્ય મહાકાલસ્ય સામ્પ્રતમ્ ॥ ૪॥

શનેર્મૃત્યુઞ્જયસ્તોત્રં બ્રૂહિ મે નેત્રજન્મનઃ ।
અકાલ મૃત્યુહરણમપમૃત્યુ નિવારણમ્ ॥ ૫॥

શનિમન્ત્રપ્રભેદા યે તૈર્યુક્તં યત્સ્તવં શુભમ્ ।
પ્રતિનામ ચથુર્યન્તં નમોન્તં મનુનાયુતમ્ ॥ ૬॥

શ્રીશઙ્કર ઉવાચ -
નિત્યે પ્રિયતમે ગૌરિ સર્વલોક-હિતેરતે ।
ગુહ્યાદ્ગુહ્યતમં દિવ્યં સર્વલોકોપકારકમ્ ॥ ૭॥

શનિમૃત્યુઞ્જયસ્તોત્રં પ્રવક્ષ્યામિ તવઽધુના ।

સર્વમઙ્ગલમાઙ્ગલ્યં સર્વશત્રુ વિમર્દનમ્ ॥ ૮॥

સર્વરોગપ્રશમનં સર્વાપદ્વિનિવારણમ્ ।
શરીરારોગ્યકરણમાયુર્વૃદ્ધિકરં નૃણામ્ ॥ ૯॥

યદિ ભક્તાસિ મે ગૌરી ગોપનીયં પ્રયત્નતઃ ।
ગોપિતં સર્વતન્ત્રેષુ તચ્છ્રણુષ્વ મહેશ્વરી ! ॥ ૧૦॥

ઋષિન્યાસં કરન્યાસં દેહન્યાસં સમાચરેત્ ।
મહોગ્રં મૂર્ધ્નિ વિન્યસ્ય મુખે વૈવસ્વતં ન્યસેત્ ॥ ૧૧॥

ગલે તુ વિન્યસેન્મન્દં બાહ્વોર્મહાગ્રહં ન્યસેત્ ।
હૃદિ ન્યસેન્મહાકાલં ગુહ્યે કૃશતનું ન્યસેત્ ॥ ૧૨॥

જાન્વોમ્તૂડુચરં ન્યસ્ય પાદયોસ્તુ શનૈશ્ચરમ્ ।
એવં ન્યાસવિધિ કૃત્વા પશ્ચાત્ કાલાત્મનઃ શનેઃ ॥ ૧૩॥

ન્યાસં ધ્યાનં પ્રવક્ષ્યામિ તનૌ શ્યાર્વા પઠેન્નરઃ ।
કલ્પાદિયુગભેદાંશ્ચ કરાઙ્ગન્યાસરુપિણઃ ॥ ૧૪॥

કાલાત્મનો ન્યસેદ્ ગાત્રે મૃત્યુઞ્જય ! નમોઽસ્તુ તે ।
મન્વન્તરાણિ સર્વાણિ મહાકાલસ્વરુપિણઃ ॥ ૧૫॥

ભાવયેત્પ્રતિ પ્રત્યઙ્ગે મહાકાલાય તે નમઃ ।
ભાવયેત્પ્રભવાદ્યબ્દાન્ શીર્ષે કાલજિતે નમઃ ॥ ૧૬॥

નમસ્તે નિત્યસેવ્યાય વિન્યસેદયને ભ્રુવોઃ ।
સૌરયે ચ નમસ્તેઽતુ ગણ્ડયોર્વિન્યસેદૃતૂન્ ॥ ૧૭॥

શ્રાવણં ભાવયેદક્ષ્ણોર્નમઃ કૃષ્ણનિભાય ચ ।
મહોગ્રાય નમો ભાર્દં તથા શ્રવણયોર્ન્યસેત્ ॥ ૧૮॥

નમો વૈ દુર્નિરીક્ષ્યાય ચાશ્વિનં વિન્યસેન્મુખે ।
નમો નીલમયૂખાય ગ્રીવાયાં કાર્તિકં ન્યસેત્ ॥ ૧૯॥

માર્ગશીર્ષ ન્યસેદ્-બાહ્વોર્મહારૌદ્રાય તે નમઃ ।
ઊર્દ્વલોક-નિવાસાય પૌષં તુ હૃદયે ન્યસેત્ ॥ ૨૦॥

નમઃ કાલપ્રબોધાય માઘં વૈ ચોદરેન્યસેત્ ।
મન્દગાય નમો મેઢ્રે ન્યસેર્દ્વફાલ્ગુનં તથા ॥ ૨૧॥

ઊર્વોર્ન્યસેચ્ચૈત્રમાસં નમઃ શિવોસ્ભવાય ચ ।
વૈશાખં વિન્યસેજ્જાન્વોર્નમઃ સંવર્ત્તકાય ચ ॥ ૨૨॥

જઙ્ઘયોર્ભાવયેજ્જ્યેષ્ઠં ભૈરવાય નમસ્તથા ।
આષાઢ઼ં પાદ્યોશ્ચૈવ શનયે ચ નમસ્તથા ॥ ૨૩॥

કૃષ્ણપક્ષં ચ ક્રૂરાય નમઃ આપાદમસ્તકે ।
ન્યસેદાશીર્ષપાદાન્તે શુક્લપક્ષં ગ્રહાય ચ ॥ ૨૪॥

નયસેન્મૂલં પાદયોશ્ચ ગ્રહાય શનયે નમઃ ।
નમઃ સર્વજિતે ચૈવ તોયં સર્વાઙ્ગુલૌ ન્યસેત્ ॥ ૨૫॥

ન્યસેદ્-ગુલ્ફ-દ્વયે વિશ્વં નમઃ શુષ્કતરાય ચ ।
વિષ્ણુભં ભાવયેજ્જઙ્ઘોભયે શિષ્ટતમાય તે ॥ ૨૬॥

જાનુદ્વયે ધનિષ્ઠાં ચ ન્યસેત્ કૃષ્ણરુચે નમઃ ।
ઊરુદ્વયે વારુર્ણાન્યસેત્કાલભૃતે નમઃ ॥ ૨૭॥

પૂર્વભાદ્રં ન્યસેન્મેઢ્રે જટાજૂટધરાય ચ ।
પૃષ્ઠઉત્તરભાદ્રં ચ કરાલાય નમસ્તથા ॥ ૨૮॥

રેવતીં ચ ન્યસેન્નાભો નમો મન્દચરાય ચ ।
ગર્ભદેશે ન્યસેદ્સ્ત્રં નમઃ શ્યામતરાય ચ ॥ ૨૯॥

નમો ભોગિસ્રજે નિત્યં યમં સ્તનયુગે ન્યસેત્ ।
ન્યેસત્કૃત્તિકાં હૃદયે નમસ્તૈલપ્રિયાય ચ ॥ ૩૦॥

રોહિણીં ભાવયેદ્ધસ્તે નમસ્તે ખડ્ગધારીણે ।
મૃગં ન્યેસતદ્વામ હસ્તે ત્રિદણ્ડોલ્લસિતાય ચ ॥ ૩૧॥

દક્ષોર્દ્ધ્વ ભાવયેદ્રૌદ્રં નમો વૈ બાણધારિણે ।
પુનર્વસુમૂર્દ્ધ્વ નમો વૈ ચાપધારિણે ॥ ૩૨॥

તિષ્યં ન્યસેદ્દક્ષબાહૌ નમસ્તે હર મન્યવે ।
સાર્પં ન્યસેદ્વામબાહૌ ચોગ્રચાપાય તે નમઃ ॥ ૩૩॥

મઘાં વિભાવયેત્કણ્ઠે નમસ્તે ભસ્મધારિણે ।
મુખે ન્યસેદ્-ભગર્ક્ષં ચ નમઃ ક્રૂરગ્રહાય ચ ॥ ૩૪॥

ભાવયેદ્દક્ષનાસાયામર્યમાણશ્ચ યોગિને ।
ભાવયેદ્વામનાસાયાં હસ્તર્ક્ષં ધારિણે નમઃ ॥ ૩૫॥

ત્વાષ્ટ્રં ન્યસેદ્દક્ષકર્ણે કૃસરાન્ન પ્રિયાય તે ।
સ્વાતીં ન્યેસદ્વામકર્ણે નમો બૃહ્મમયાય તે ॥ ૩૬॥

વિશાખાં ચ દક્ષનેત્રે નમસ્તે જ્ઞાનદૃષ્ટયે ।
મૈત્રં ન્યસેદ્વામનેત્રે નમોઽન્ધલોચનાય તે ॥ ૩૭॥

શાક્રં ન્યસેચ્ચ શિરસિ નમઃ સંવર્તકાય ચ ।
વિષ્કુમ્ભં ભાવયેચ્છીર્ષેસન્ધૌ કાલાય તે નમઃ ॥ ૩૮॥

પ્રીતિયોગં ભ્રુવોઃ સન્ધૌ મહામન્દં ! નમોઽસ્તુ તે ।
નેત્રયોઃ સન્ધાવાયુષ્મદ્યોગં ભીષ્માય તે નમઃ ॥ ૩૯॥

સૌભાગ્યં ભાવયેન્નાસાસન્ધૌ ફલાશનાય ચ ।
શોભનં ભાવયેત્કર્ણે સન્ધૌ પિણ્યાત્મને નમઃ ॥ ૪૦॥

નમઃ કૃષ્ણયાતિગણ્ડં હનુસન્ધૌ વિભાવયેત્ ।
નમો નિર્માંસદેહાય સુકર્માણં શિરોધરે ॥ ૪૧॥

ધૃતિં ન્યસેદ્દક્ષવાહૌ પૃષ્ઠે છાયાસુતાય ચ ।
તન્મૂલસન્ધૌ શૂલં ચ ન્યસેદુગ્રાય તે નમઃ ॥ ૪૨॥

તત્કૂર્પરે ન્યસેદગણ્ડે નિત્યાનન્દાય તે નમઃ ।
વૃદ્ધિં તન્મણિબન્ધે ચ કાલજ્ઞાય નમો ન્યસેત્ ॥ ૪૩॥

ધ્રુવં તદ્ઙ્ગુલી-મૂલસન્ધૌ કૃષ્ણાય તે નમઃ ।
વ્યાઘાતં ભાવયેદ્વામબાહુપૃષ્ઠે કૃશાય ચ ॥ ૪૪॥

હર્ષણં તન્મૂલસન્ધૌ ભુતસન્તાપિને નમઃ ।
તત્કૂર્પરે ન્યસેદ્વજ્રં સાનન્દાય નમોઽસ્તુ તે ॥ ૪૫॥

સિદ્ધિં તન્મણિબન્ધે ચ ન્યસેત્ કાલાગ્નયે નમઃ ।
વ્યતીપાતં કરાગ્રેષુ ન્યસેત્કાલકૃતે નમઃ ॥ ૪૬॥

વરીયાંસં દક્ષપાર્શ્વસન્ધૌ કાલાત્મને નમઃ ।
પરિઘં ભાવયેદ્વામપાર્શ્વસન્ધૌ નમોઽસ્તુ તે ॥ ૪૭॥

ન્યસેદ્દક્ષોરુસન્ધૌ ચ શિવં વૈ કાલસાક્ષિણે ।
તજ્જાનૌ ભાવયેત્સિદ્ધિં મહાદેહાય તે નમઃ ॥ ૪૮॥

સાધ્યં ન્યસેચ્ચ તદ્-ગુલ્ફસન્ધૌ ઘોરાય તે નમઃ ।

ન્યસેત્તદઙ્ગુલીસન્ધૌ શુભં રૌદ્રાય તે નમઃ ॥ ૪૯॥

ન્યસેદ્વામારુસન્ધૌ ચ શુક્લકાલવિદે નમઃ ।
બ્રહ્મયોગં ચ તજ્જાનો ન્યસેત્સદ્યોગિને નમઃ ॥ ૫૦॥

ઐન્દ્રં તદ્-ગુલ્ફસન્ધૌ ચ યોગાઽધીશાય તે નમઃ ।
ન્યસેત્તદઙ્ગુલીસન્ધૌ નમો ભવ્યાય વૈધૃતિમ્ ॥ ૫૧॥

ચર્મણિ બવકરણં ભાવયેદ્યજ્વને નમઃ ।
બાલવં ભાવયેદ્રક્તે સંહારક ! નમોઽસ્તુ તે ॥ ૫૨॥

કૌલવં ભાવયેદસ્થ્નિ નમસ્તે સર્વભક્ષિણે ।
તૈત્તિલં ભાવયેન્મસિ આમમાંસપ્રિયાય તે ॥ ૫૩॥

ગરં ન્યસેદ્વપાયાં ચ સર્વગ્રાસાય તે નમઃ ।
ન્યસેદ્વણિજં મજ્જાયાં સર્વાન્તક ! નમોઽસ્તુ તે ॥ ૫૪॥

વિર્યેવિભાવયેદ્વિષ્ટિં નમો મન્યૂગ્રતેજસે ।
રુદ્રમિત્ર ! પિતૃવસુવારીણ્યેતાંશ્ચ પઞ્ચ ચ ॥ ૫૫॥

મુહૂર્તાંશ્ચ દક્ષપાદનખેષુ ભાવયેન્નમઃ ।
ખગેશાય ચ ખસ્થાય ખેચરાય સ્વરુપિણે ॥ ૫૬॥

પુરુહૂતશતમખે વિશ્વવેધો-વિધૂંસ્તથા ।
મુહૂર્તાંશ્ચ વામપાદનખેષુ ભાવયેન્નમઃ ॥ ૫૭॥

સત્યવ્રતાય સત્યાય નિત્યસત્યાય તે નમઃ ।
સિદ્ધેશ્વર ! નમસ્તુભ્યં યોગેશ્વર ! નમોઽસ્તુ તે ॥ ૫૮॥

વહ્નિનક્તઞ્ચરાંશ્ચૈવ વરુણાર્યમયોનકાન્ ।
મુહૂર્તાંશ્ચ દક્ષહસ્તનખેષુ ભાવયેન્નમઃ ॥ ૫૯॥

લગ્નોદયાય દીર્ઘાય માર્ગિણે દક્ષદૃષ્ટયે ।
વક્રાય ચાતિક્રૂરાય નમસ્તે વામદૃષ્ટયે ॥ ૬૦॥

વામહસ્તનખેષ્વન્ત્યવર્ણેશાય નમોઽસ્તુ તે ।
ગિરિશાહિર્બુધ્ન્યપૂષાજપષ્દ્સ્રાંશ્ચ ભાવયેત્ ॥ ૬૧॥

રાશિભોક્ત્રે રાશિગાય રાશિભ્રમણકારિણે ।
રાશિનાથાય રાશીનાં ફલદાત્રે નમોઽસ્તુ તે ॥ ૬૨॥

યમાગ્નિ-ચન્દ્રાદિતિજવિધાતૃંશ્ચ વિભાવયેત્ ।
ઊર્દ્ધ્વ-હસ્ત-દક્ષનખેષ્વત્યકાલાય તે નમઃ ॥ ૬૩॥

તુલોચ્ચસ્થાય સૌમ્યાય નક્રકુમ્ભગૃહાય ચ ।
સમીરત્વષ્ટજીવાંશ્ચ વિષ્ણુ તિગ્મ દ્યુતીન્નયસેત્ ॥ ૬૪॥

ઊર્ધ્વ-વામહસ્ત-નખેષ્વન્યગ્રહ નિવારિણે ।
તુષ્ટાય ચ વરિષ્ઠાય નમો રાહુસખાય ચ ॥ ૬૫॥

રવિવારં લલાટે ચ ન્યસેદ્-ભીમદૃશે નમઃ ।
સોમવારં ન્યસેદાસ્યે નમો મૃતપ્રિયાય ચ ॥ ૬૬॥

ભૌમવારં ન્યસેત્સ્વાન્તે નમો બ્રહ્મ-સ્વરુપિણે ।
મેઢ્રં ન્યસેત્સૌમ્યવારં નમો જીવ-સ્વરુપિણે ॥ ૬૭॥

વૃષણે ગુરુવારં ચ નમો મન્ત્ર-સ્વરુપિણે ।
ભૃગુવારં મલદ્વારે નમઃ પ્રલયકારિણે ॥ ૬૮॥

પાદયોઃ શનિવારં ચ નિર્માંસાય નમોઽસ્તુ તે ।
ઘટિકા ન્યસેત્કેશેષુ નમસ્તે સૂક્ષ્મરુપિણે ॥ ૬૯॥

કાલરુપિન્નમસ્તેઽસ્તુ સર્વપાપપ્રણાશકઃ !।
ત્રિપુરસ્ય વધાર્થાંય શમ્ભુજાતાય તે નમઃ ॥ ૭૦॥

નમઃ કાલશરીરાય કાલનુન્નાય તે નમઃ ।
કાલહેતો ! નમસ્તુભ્યં કાલનન્દાય વૈ નમઃ ॥ ૭૧॥

અખણ્ડદણ્ડમાનાય ત્વનાદ્યન્તાય વૈ નમઃ ।
કાલદેવાય કાલાય કાલકાલાય તે નમઃ ॥ ૭૨॥

નિમેષાદિમહાકલ્પકાલરુપં ચ ભૈરવમ્ ।
મૃત્યુઞ્જયં મહાકાલં નમસ્યામિ શનૈશ્ચરમ્ ॥ ૭૩॥

દાતારં સર્વભવ્યાનાં ભક્તાનામભયઙ્કરમ્ ।
મૃત્યુઞ્જયં મહાકાલં નમસ્યામિ શનૈશ્ચરમ્ ॥ ૭૪॥

કર્ત્તારં સર્વદુઃખાનાં દુષ્ટાનાં ભયવર્ધનમ્ ।
મૃત્યુઞ્જયં મહાકાલં નમસ્યામિ શનૈશ્ચરમ્ ॥ ૭૫॥

હર્ત્તારં ગ્રહજાતાનાં ફલાનામઘકારિણામ્ ।
મૃત્યુઞ્જયં મહાકાલં નમસ્યામિ શનૈશ્ચરમ્ ॥ ૭૬॥

સર્વેષામેવ ભૂતાનાં સુખદં શાન્તમવ્યયમ્ ।
મૃત્યુઞ્જયં મહાકાલં નમસ્યામિ શનૈશ્ચરમ્ ॥ ૭૭॥

કારણં સુખદુઃખાનાં ભાવાઽભાવ-સ્વરુપિણમ્ ।
મૃત્યુઞ્જયં મહાકાલં નમસ્યામિ શનૈશ્ચરમ્ ॥ ૭૮॥

અકાલ-મૃત્યુ-હરણઽમપમૃત્યુ નિવારણમ્ ।
મૃત્યુઞ્જયં મહાકાલં નમસ્યામિ શનૈશ્ચરમ્ ॥ ૭૯॥

કાલરુપેણ સંસાર ભક્ષયન્તં મહાગ્રહમ્ ।
મૃત્યુઞ્જયં મહાકાલં નમસ્યામિ શનૈશ્ચરમ્ ॥ ૮૦॥

દુર્નિરીક્ષ્યં સ્થૂલરોમં ભીષણં દીર્ઘ-લોચનમ્ ।
મૃત્યુઞ્જયં મહાકાલં નમસ્યામિ શનૈશ્ચરમ્ ॥ ૮૧॥

ગ્રહાણાં ગ્રહભૂતં ચ સર્વગ્રહ-નિવારણમ્ ।
મૃત્યુઞ્જયં મહાકાલં નમસ્યામિ શનૈશ્ચરમ્ ॥ ૮૨॥

કાલસ્ય વશગાઃ સર્વે ન કાલઃ કસ્યચિદ્વશઃ ।
તસ્માત્ત્વાં કાલપુરુષં પ્રણતોઽસ્મિ શનૈશ્ચરમ્ ॥ ૮૩॥

કાલદેવ જગત્સર્વં કાલ એવ વિલીયતે ।
કાલરુપં સ્વયં શમ્ભુઃ કાલાત્મા ગ્રહદેવતા ॥ ૮૪॥

ચણ્ડીશો રુદ્રડાકિન્યાક્રાન્તશ્ચણ્ડીશ ઉચ્યતે ।
વિદ્યુદાકલિતો નદ્યાં સમારુઢો રસાધિપઃ ॥ ૮૫॥

ચણ્ડીશઃ શુકસંયુક્તો જિહ્વયા લલિતઃ પુનઃ ।
ક્ષતજસ્તામસી શોભી સ્થિરાત્મા વિદ્યુતા યુતઃ ॥ ૮૬॥

નમોઽન્તો મનુરિત્યેષ શનિતુષ્ટિકરઃ શિવે ।
આદ્યન્તેઽષ્ટોત્તરશતં મનુમેનં જપેન્નરઃ ॥ ૮૭॥

યઃ પઠેચ્છ્રણુયાદ્વાપિ ધ્યાત્ત્વા સમ્પૂજ્ય ભક્તિતઃ ।
તસ્ય મૃત્યોર્ભયં નૈવ શતવર્ષાવધિપ્રિયે !॥ ૮૮॥

જ્વરાઃ સર્વે વિનશ્યન્તિ દદ્રુ-વિસ્ફોટકચ્છુકાઃ ।
દિવા સૌરિં સ્મરેત્ રાત્રૌ મહાકાલં યજન્ પઠેત ॥ ૮૯॥

જન્મર્ક્ષે ચ યદા સૌરિર્જપેદેતત્સહસ્રકમ્ ।

વેધગે વામવેધે વા જપેદર્દ્ધસહસ્રકમ્ ॥ ૯૦॥

દ્વિતીયે દ્વાદશે મન્દે તનૌ વા ચાષ્ટમેઽપિ વા ।
તત્તદ્રાશૌ ભવેદ્યાવત્ પઠેત્તાવદ્દિનાવધિ ॥ ૯૧॥

ચતુર્થે દશમે વાઽપિ સપ્તમે નવપઞ્ચમે ।
ગોચરે જન્મલગ્નેશે દશાસ્વન્તર્દશાસુ ચ ॥ ૯૨॥

ગુરુલાઘવજ્ઞાનેન પઠેદાવૃત્તિસઙ્ખ્યયા ।
શતમેકં ત્રયં વાથ શતયુગ્મં કદાચન ॥ ૯૩॥

આપદસ્તસ્ય નશ્યન્તિ પાપાનિ ચ જયં ભવેત્ ।
મહાકાલાલયે પીઠે હ્યથવા જલસન્નિધૌ ॥ ૯૪॥

પુણ્યક્ષેત્રેઽશ્વત્થમૂલે તૈલકુમ્ભાગ્રતો ગૃહે ।
નિયમેનૈકભક્તેન બ્રહ્મચર્યેણ મૌનિના ॥ ૯૫॥

શ્રોતવ્યં પઠિતવ્યં ચ સાધકાનાં સુખાવહમ્ ।
પરં સ્વસ્ત્યયનં પુણ્યં સ્તોત્રં મૃત્યુઞ્જયાભિધમ્ ॥ ૯૬॥

કાલક્રમેણ કથિતં ન્યાસક્રમ સમન્વિતમ્ ।
પ્રાતઃકાલે શુચિર્ભૂત્વા પૂજાયાં ચ નિશામુખે ॥ ૯૭॥

પઠતાં નૈવ દુષ્ટેભ્યો વ્યાઘ્રસર્પાદિતો ભયમ્ ।
નાગ્નિતો ન જલાદ્વાયોર્દેશે દેશાન્તરેઽથવા ॥ ૯૮॥

નાઽકાલે મરણં તેષાં નાઽપમૃત્યુભયં ભવેત્ ।
આયુર્વર્ષશતં સાગ્રં ભવન્તિ ચિરજીવિનઃ ॥ ૯૯॥

નાઽતઃ પરતરં સ્તોત્રં શનિતુષ્ટિકરં મહત્ ।
શાન્તિકં શીઘ્રફલદં સ્તોત્રમેતન્મયોદિતમ્ ॥ ૧૦૦॥

તસ્માત્સર્વપ્રયત્નેન યદીચ્છેદાત્મનો હિતમ્ ।
કથનીયં મહાદેવિ ! નૈવાભક્તસ્ય કસ્યચિત્ ॥ ૧૦૧॥

॥ ઇતિ માર્તણ્ડભૈરવતન્ત્રે મહાકાલશનિમૃત્યુઞ્જયસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Shri MahakAla Shanimrityunjaya Stotram*

pdf was typeset on July 21, 2022

Please send corrections to *sanskrit@cheerful.com*